# Teach Yourself Samskrit

## संस्कृतस्वाध्यायः

द्वितीया दीक्षा

# व्यवहारप्रदीपः

## द्वितीयः भागः

सम्पादकः
वेम्पटि कुटुम्बशास्त्री

राष्ट्रिय संस्कृत संस्थानम्
मानितविश्वविद्यालयः
नव देहली

**कति / कियत् शब्दयोः प्रयोगाः**

## अधोलिखितानि वाक्यानि पठत–

[ अधोलिखित वाक्यों को पढ़ें। Read the following sentences. ]

विद्यालये **कति** छात्राः पठन्ति ?

**कतिभ्यः** जनेभ्यः एतद् दातव्यम् ?

भवनस्य विशालत्वं **कियत्** ?

वृक्षस्य औन्नत्यं **कियत्** ?

## विवरणम्

☞ उपरिनिर्दिष्टवाक्येषु 'कति'-शब्दः 'कियत्'-शब्दः च प्रयुक्तौ स्तः। यत्र सङ्ख्या पृच्छ्यते उत्तरं च अपेक्ष्यते तत्र कति-शब्दः प्रयुज्यते। उदा.- "सभायाम् अत्र कति जनाः सन्ति ?" अत्र जनाः गणना-साध्याः। अतः 'कति'-शब्दस्य प्रयोगः कृतः। यत्र परिमाणं पृच्छ्यते तत्र 'कियत्'-शब्दः प्रयुज्यते। उदा.- "पात्रे कियत् जलम् अस्ति ?" जलं न गणना-साध्यम्। अतः 'कियत्' शब्दः प्रयुक्तः।

### स्मरत

| | | | |
|---|---|---|---|
| **कति** | कितने | How many | (उत्तरं सङ्ख्यात्मकम्) |
| **कियत्** | कितना | How much | (उत्तरं परिमाणात्मकम्) |

### अवधेयम्

☞ 'कति'-शब्दः नित्यं बहुवचनान्तः। अतः यदि उत्तरम् एकवचनं द्विवचनं वा भवेत् तदापि 'कति'-शब्दयुक्तः प्रश्नः तु बहुवचने एव स्यात्। यथा–

**प्रश्नः** भवतः गृहे कति जनाः सन्ति ?

**उत्तरम्** ⇨ एकः अस्ति (एकवचने)।

⇨ द्वौ स्तः (द्विवचने)।

⇨ त्रयः सन्ति (बहुवचने)।

## कियत्-शब्दस्य रूपाणि

### पुंलिङ्गे

| | | | |
|---|---|---|---|
| प्र. | कियान् | कियन्तौ | कियन्तः |
| द्विती. | कियन्तम् | कियन्तौ | कियतः |
| तृ. | कियता | कियद्भ्याम् | कियद्भिः |
| च. | कियते | कियद्भ्याम् | कियद्भ्यः |
| पं. | कियतः | कियद्भ्याम् | कियद्भ्यः |
| ष. | कियतः | कियतोः | कियताम् |
| स. | कियति | कियतोः | कियत्सु |

### स्त्रीलिङ्गे

| | | | |
|---|---|---|---|
| प्र. | कियती | कियत्यौ | कियत्यः |
| द्विती. | कियतीम् | कियत्यौ | कियतीः |
| तृ. | कियत्या | कियतीभ्याम् | कियतीभिः |
| च. | कियत्यै | कियतीभ्याम् | कियतीभ्यः |
| पं. | कियत्याः | कियतीभ्याम् | कियतीभ्यः |
| ष. | कियत्याः | कियत्योः | कियतीनाम् |
| स. | कियत्याम् | कियत्योः | कियतीसु |

### नपुंसकलिङ्गे

| | | | |
|---|---|---|---|
| प्र. | कियत् | कियती | कियन्ति |
| द्विती. | कियत् | कियती | कियन्ति |

तृ.
च.
पं. → पुंलिङ्गवत्
ष.
स.

## कति-शब्दस्य रूपाणि

| | |
|---|---|
| **प्र.** | कति |
| **द्विती.** | कति |
| **तृ.** | कतिभिः |
| **च.** | कतिभ्यः |
| **पं.** | कतिभ्यः |
| **ष.** | कतीनाम् |
| **स.** | कतिषु |

**अवधेयम्**

**कति**-शब्दस्य रूपाणि त्रिषु लिङ्गेषु समानानि भवन्ति।

## अभ्यासः — 262

✍ **'कति' शब्दस्य विविधैः विभक्तिरूपैः रिक्तस्थानं पूरयत—**

['कति' शब्द के विविध विभक्ति रूप से रिक्तस्थान की पूर्ति करें। Fill in the blanks with various forms of *kati*.]

उदा. ....**कतीनां**.... जनानाम् अनुरक्तिः संस्कृते अस्ति ?

1. ........ छात्रेभ्यः पुरस्कारान् दास्यति शिक्षकः ?
2. ........ गृहेषु सङ्गणक-यन्त्राणि सन्ति ?
3. ........ वृक्षेषु फलानि सन्ति ?
4. ........ छात्रान् पाठयति अध्यापिका ?
5. ........ शिक्षकाः विरामे सन्ति ?
6. ........ वणिग्भ्यः वस्तूनि क्रीतानि ?
7. ........ महिलाभिः पूजा कृता ?
8. ........ शिक्षकैः पाठाः पाठिताः ?
9. ........ पुष्पाणि योजयति बालिका ?
10. ........ छात्राणां कक्षायाम् उपस्थितिः अस्ति ?

## अभ्यासः — 263

✍ **अधोनिर्दिष्टेषु वाक्येषु औचित्यं दृष्ट्वा कति-शब्दं कियत्-शब्दं वा स्थापयत—**
[अधोनिर्दिष्ट वाक्यों में औचित्य की दृष्टि से 'कति' शब्द या कियत् शब्द का प्रयोग करें। Use the word '*kati*' or '*kiyat*' as required in the following sentences. ]

उदा. ......**कति**...... जनाः नाटकं दृष्टवन्तः ?
1. महिलाः स्नातुं गच्छन्ति ?
2. कृषकाः क्षेत्रं कर्षन्ति ?
3. नदीषु मकराः सन्ति ?
4. तडागे जलम् अस्ति ?
5. इयं धेनुः दुग्धं ददाति ?
6. नाटकानां प्रदर्शनं जातम् ?
7. श्रमिकैः वृत्तिः लब्धा ?
8. शर्करया पायसं निर्माति ?
9. तैलस्य मूल्यम् ?
10. औन्नत्यं पर्वतस्य ?
11. क्रीडकैः पुरस्काराः प्राप्ताः ?
12. शिशुभ्यः मोदकानि देयानि।
13. जलेन औषधं पेयम् ?
14. जम्बीररसम् इच्छति भवान् ?
15. प्राणाः भवन्ति।

## अभ्यासः — 264

✍ **उत्तरानुगुणं 'कति'-शब्देन 'कियत्'-शब्देन वा उचितानि प्रश्नवाक्यानि लिखत—**
[ उत्तर के अनुरूप 'कति' शब्द या 'कियत्' शब्द के प्रयोग से उचित प्रश्नवाक्य लिखें। Write the interrogative sentences with the use of either '*kati*' or '*kiyat*' as per the answers given. ]

**उदा.** उ.- मम गृहे दश जनाः सन्ति।
**प्र.**- तव गृहे कति जनाः सन्ति ?

1. उ.- मम विद्यालये सप्ततिः छात्राः सन्ति।
प्र.- ?

2. उ.- अस्य वृक्षस्य औन्नत्यं महत् अस्ति।
प्र.- ?

3. उ.- अस्मिन् तडागे बहवः मत्स्याः सन्ति।
प्र.- ?

4. उ.- दशरथस्य चत्वारः पुत्राः आसन्।
प्र.- ?

5. उ.- द्रौपद्याः पञ्च पुत्राः आसन्।
प्र.- ?

6. उ.- अस्मिन् वृक्षे प्रभूतानि फलानि सन्ति।
प्र.- ?

7. उ.- अस्मिन् प्रदेशे दश अजाः चरन्ति।
प्र.- ?

8. उ.- अहं दुग्धे न्यूनां शर्कराम् इच्छामि।
प्र.- ?

9. उ.- अद्य त्रयाणां देवानां नूतनकलेवरः भविष्यति।
प्र.- ?

10. उ.- अस्य कटस्य दैर्घ्यम् अधिकं वर्तते।
प्र.- ?

11. उ.- अस्य आसन्दस्य औन्नत्यं द्विपादमितम् अस्ति।
प्र.- ?

12. उ.- मम गृहम् इतः दशसु क्रोशेषु अस्ति।
प्र.- ?

13. उ.- इदं यानं बहुशब्दं करोति।
प्र.- ?